नं. ४११७/क — ४११८/ख.

नाम. क. काली कवचम्.
ख. काली सहस्रनाम.

कर्ता. × × × ×

पत्र सं. ५१ — सं. ×

विषय: तन्त्रम्.

क कालिकाकवचम् ४

ख कालीनामसहस्रम् ४६

४९९७ — ४९९८

4997-4998

I 1 to 46
II 1 to 4
F. = 50

ॐ कैलासशि
खरे रम्ये नानादेवगणावृते नानावृक्षलताकीर्णे नानापक्षिर
वैर्युते १ चन्द्रमंडलसंयुक्ते शृंगारमंडपस्थिते समाधौ संस्थि
तं शान्तं क्रीडंतं योगिनीप्रियं २ तत्र मौनपरं दृष्ट्वा देवी पृच्छति
शंकरं किं त्वया जप्यते नाथ किं त्वया स्मर्यते स
दा ३ सृष्टिः कुत्र विलीनास्ति पुनः कुत्र प्रजायते ब्रह्मांडका
रणं किं तत्किमाद्यं कारणं महत् ४ मनोरथमयी सिद्धिर्वा
ञ्छासिद्धिस्तथा शिव तृतीया कल्पनासिद्धिः कोटिसिद्धीश्व

रत्वकं ५ शक्तिपाताष्टदशकंचराचरशरीरगतिः महेंद्रजालमिं
द्रादिजालानांरचनांतथा ६ अणिमादिचरत्वंचपरकायप्रवे
शनं नवीनसृष्टिकरणंसमुद्रशोषणंतथा ७ अमायांचंद्र
संदृष्टिर्दिवाचंद्रप्रकाशनं चंद्राष्टकंचाष्टदिक्षुतथासूर्याष्ट।
कंशिव ८ जलेजलमयत्वंचवह्नौवह्निमयत्वकं ब्रह्मविष्ण्वा
दिनिर्माणंमित्राणांकारणंपरं ९ पादुकाद्युदिकायक्षवेता
लपंचकंतथा रसायनंतथाञ्जनिस्तथैवचविलांजनं १०
महामधुमतीसिद्धिस्तथापद्मावतीशिव तथाभोगवती। १

सिद्धिर्यावंत्यः संतिसिद्धयः ११ केनमंत्रेणतपसा कलौपाप
समाकुले आयुष्यपुण्यरहिते कथंभवतितद्वद १२
विनामंत्रं विनास्तोत्रं विनैवतपसाप्रिये विनाब
लिं विनान्यासंभूतशुद्धिंविनाप्रिये १३ विनाक्लेशादिभि
र्दैविव्रतदुःखादिभिर्विना विनाध्यानं विनायंत्रं विनापूजा
दिनाप्रिये १४ सिद्धिराशुभवत्येवतदेवकथ्यतेमया ए
षुब्रह्मांडगोलेषु पंचाशद्धर्ममध्यगे १५ पंचशून्येस्थिता

तारासर्वातेकालिकास्थिता अनंतकोटिब्रह्मांडराजदंताग्र
केशिवे १६ व्याप्यशून्यालयंहृत्वाहंसवर्णंविधायच म
हानिर्गुणरूपात्व वाचालीतापराकला १७ क्रीडयाशून्य
रूपंत्वभर्त्तारंचप्रकल्प्यच सृष्टेरारंभकार्यार्थंछायाहृष्टा
तदात्तया १८ इच्छाशक्तिस्त्वसाजातातयाकालोविनिर्मि
तः प्रतिबिंबंतत्रदृष्टज्ञातात्ज्ञानाभिधात्वसा १९ इदमेतत्किं
विशिष्टंज्ञानंविज्ञानकंयदा तदाक्रियाभिधाजातातदि। २

च्छातोमहेश्वरि २० ब्रह्मांडगोलंदेवेशिराजदंतस्थितंतथयत्र
साक्रियास्थापयामासस्वस्वस्थानक्रमेणच २१ तत्रैवस्वे
च्छयादेवीसामरस्यपरायणा यदिच्छाकथ्यतेदेवियथावा
द्वधारय २२ युगादिसमयेदेविशिवंपरगुणोत्तरं तदिच्छा
निर्गुणंशांतंसच्चिदानंदविग्रहं २३ शाश्वतंसुंदरंशुभ्रंस
र्वदेवस्तुतंपरं आदिनाथंगुणातीतंकल्पासंस्तुतमीश्वरं २४
विपरीतरतंदेवंसामरस्यपरायणं सृजार्थमागतान्देवंगंध

वीप्सरसांगणान् २५ यक्षिणीकिन्नरीमर्त्याः स्वर्वैश्याद्यां।
तिलोत्तमां वीक्ष्यतन्मायया प्राह सुंदरी प्राणवल्लभे २६
त्रैलोक्यसुंदरिप्राणस्वामिनि प्राणरंजिनि किमागतं भव
त्याद्य मम भाग्यार्णवो महान् २७ इत्थं मौनधरं शंभुं पूज्यम
प्सरोगणाः संहारा[illegible]रितं देवत्वयाविघ्नं जन
प्रियं २८ स्वेष्टेरारंभकार्यार्थं [illegible]तोसि महाप्रभो वेषणा[illegible]
त्वमिदं देव मंगलार्थं प्रयायणं २९ प्रयाणोत्सवकालेत्व स
२

मारंभेप्रगायणं युगाद्यारंभकालोहिवर्जनेयत्नशंकर २०
इंद्राणीकोटयः संतितस्याः प्रसवविंदुतः ब्राह्मीणांवैस्नवी
नांचमाहेश्वरीकोटिकोटयः २१ नवसामरसानंददर्शनार्थंस
मुद्भवाः संयातास्त्वागतादेवचास्माकंसौख्यसागरः २२ र
तिंहित्वाकामिनीनांनान्यत्सौख्यंमहेश्वर सारनिर्हंसपते
स्माभिर्महासौख्यार्थंकारिका २३ एवमेवत्वचास्माभिः
कर्तव्यंतत्वयासह एवंश्रुत्वामहादेवोध्यानावस्थितमा

नमः २४ ध्यानंहित्वामाययात्वप्रोवाचकालिकांप्रति कालि
कालिमहामायाप्रियेभैरवनादिनि २५ शिवारूपधरेक्रूरे
घोरदंष्ट्राभयानके त्रैलोक्यभंजनकरिहृदयंःसंतितेप्रतः २६
सुंदरीविद्युच्छांत्यर्थंमहाकालप्रियेशिवे ध्यानंत्वंचमहादेवि
नागकंतिगृहंप्रति २७ नवरूपंमहाकालिमहाकालप्रियंक
रं एतासांसुंदरंरूपंत्रैलोक्यप्रियकारकं २८ एवंमायाभ्रमा
विष्टोमहाकालोवदन्निति ईदकालवचःश्रुत्वाकालंप्राह ४

चकालिका ३९ माययाछाद्यचात्मानं निजस्त्रीरूपधारिणी
इतः प्रभृतिस्त्रीमात्रं भविष्यति युगे युगे ४० कल्पाद्यौ षष्ठयोदे
वदिवावलीस्वरूपतो राज्ञोस्त्रीरूपमास्थाय क्रीडंतिचपरस्परं
४१ अज्ञानं चैव सर्वेषां भविष्यति युगे युगे एवं शापं प्रदत्वातत्त
नः प्रोवाच कालिका ४२ विपरीतरतं कृत्वा चिंतयंतिभजंति
ये तेषां वरं प्रदास्यामि तत्र नित्यं वसाम्यहं ४३ इत्युक्त्वा कालि
काविद्यातत्रैवांतरधीयत त्रिंशत्त्रिखर्वषट्वृंदनवत्यर्बुदकोटयः ४४

दर्शनार्थंतपस्तेपेसावैकुत्रगताप्रिया ममप्राणप्रियादेवीमहा
प्राणप्रियामम ४५ किंकरोमिक्वगच्छामिइत्येवंभ्रमसंकुलः
तदाकालस्वरूपयाहोममचिंतापरःशिवः ४६ यंत्रप्रस्तारबुद्धि
स्त्वद्दत्तादेवायसत्वरं यंत्रंज्ञातेतदारभ्यपूर्वंविद्धुनगोचरं ४७
श्रीचक्रराजप्रस्ताररचनाभ्यासतत्परः इतस्ततोभ्राम्यमानहैव
लोकाच्चक्रमध्यगः ४८ चक्रपारदर्शनार्थंकोटाद्विंदद्युगंगतं मा
हूपानप्रियादेवीमहाश्रीचक्रनायिका ४९ तत्रविंदौपरंरूपंहं ५

दरंसुमनोहरं रूपंजातंमहेशानिजायत्रिपुरसुंदरं ५० रूपंदृष्ट्वा
महादेवोराजराजेश्वरोह्यभूत् तस्याःकोटांशमात्रेणतस्यारूप
धरःशिवः ५१ विनाशृंगाररसेनकृतानंददायितामहेश्वरी विना
कालंशांतोदेविजगत्स्थावरजंगमे ५२ त्वंशृंगारेनशक्तिस्त्वंका
पिनास्तिमहेश्वरि इंद्रियैःप्रार्थिताकालीत्वष्टाप्रोवाचकालिका
५३ सर्वेषांनेत्रकोणेषुममोक्षोभविष्यति पूर्वावस्थास्तुदेवे
शिममोक्षालिङ्गतिप्रिये ५४ सावस्थातत्क्षणात्प्राप्तातत्रदेवेनैव

तिष्ठति मङ्कलानाममहेशानिसदातिष्ठतुनिश्चिता ५५ शक्तिस्त्व

ङ्कथितायातातथारूपंनसुंदरं चिंताविष्टातुमलिनाजातात

त्रसुंदरी ५६ तपसिस्थित्वाध्यानपराकालीचिंतनतत्परा त

दाकालीप्रसन्नाभूत्तत्क्षणाद्देवनिश्चितं ५७ वरंब्रूहिवरंब्रूहि

वरंब्रूहीतिवादिनी ममशक्तिंपरांदेहिवरो

यंप्रार्थितोमया ५८ नाहरूपायंकथययेनशक्तिर्भविष्यति

ममनामसहस्रंचमयासर्वंविनिर्मितं ५९ ६

मत्स्वरूपं ककाराख्यं महासाम्राज्यनामकं वरदानाभिधं नामरत्न।
णाह्लीहरदायकं ६० तत्पठस्व महामाये तव शक्तिर्भविष्यति
ततःप्रभृति श्रीविद्या तन्नामपाठतत्परा ६१ तदेव नामसाहस्रं
सुंदरीशक्तिदायकं कथ्यते परयाभक्त्या साधयस्व महेश्वरि ६२
मद्यैर्मांसैस्तथा शुक्रैः सर्वरक्तैस्तथा शिवे पूजयेत्तर्पयेत्कालीं वि
परीतरतिं चरेत् ६३ विपरीतरते देवि काली तिष्ठति नित्यशः
माध्वीकस्तुकण्ठपानात्मैथुनात्तु विरागिणी ६४ वैस्रवी व्यापका

विद्या श्मशानवासिनी परा वीरसाधनसंतुष्टा वीरास्फालनिना
दिनी ६५ शिवाबलिसंतुष्टात्मा शिवारूपादिचंडिका कामानं
दपरा स्तोत्रप्रिया स्वस्थमानसा ६६ ब्रह्मानंदपरासांद्रमैथुना
नंदतोषिणी योगींद्रहृदयागारा रात्रिंदिवविपर्ययात् ६७ दि
वानिशि विपरीता विपरीतरतातुरा तरुणात्तुष्टा च सत्पद्मादंत
मालाजपप्रिया ६८ खड्गहस्तो मुक्तकेशो दिगंबरविभूषितः
शय्यास्थश्चुंबनानंदी वेश्यासंगपरायणः ६९ पठेन्नामसहस्रा ७

त्वंमेधासाम्राज्यनामकं यथादिव्यास्तुतैर्दिव्याःप्रसन्नाःक्षण
मात्रतः ७० तथातेनमहाकालीप्रसन्नापाठमात्रतः कथ्यते
नामसाहस्रंसावधानमनाःशृणु ७१ सर्वसाम्राज्यमेधाख्यना
मसाहस्रकस्यच महाकालऋषिःप्रोक्तउष्णिकछंदःप्रकी
र्तितं ७२ देवतादक्षिणाकालीमायाबीजंप्रकीर्तितं ह्रूंश
क्तिःकालिकाबीजंकीलकंपरिकीर्तितं ७३ कालिकावर
दानादिस्वेष्टार्थेविनियोगता कर्षरेणषडंगानिषदीर्घाद्येन

कारयेत् ७४ ध्यानं तत्सर्व्ववत्कृत्वा साधयेत्स्वेष्टसाधनं ७५ ॐ अ
स्य श्रीकालिकासर्वसाम्राज्यमेधाख्यनामसाहस्रस्तवराजस्य
श्रीमहाकालऋषिः उष्णिक्छंदः श्रीमदद्वैतरूपिणीदक्षिण
कालिकादेवता क्रींबीजं हूँशक्तिः क्रींकीलकं श्रीकालिका
वरदानादिस्वेष्टार्थे पाठे विनियोगः इतिकृतांजलिःस्मृत्वान्यसे
त् श्रीमहाकालऋषये नमः शिरसि उष्णिक्छंदसे नमः मुखे
श्रीमदद्वैतरूपिणीदक्षिणकालीदेवतायै नमः हृदि क्रींबीजा ८

यनमः गुह्ये ह्रूँ शक्तयेनमः पादयोः क्लीं कीलकायनमः ना
भौ श्रीकालिकावरदानादिस्वेष्टार्थे विनियोगः सर्वांगेषु
क्रां अंगुष्ठाभ्यां नमः क्रीं
तर्जनीभ्यां स्वाहा क्रूं मध्यमाभ्यां वषट् क्रैं अनामिकाभ्यां हुं
क्रौं कनिष्ठिकाभ्यां वौषट् क्रः करतलकरपृष्ठाभ्यां फट्
ॐ सद्यश्छिन्नशिरः कृ
पाणमभयं हस्तैर्वरं बिभ्रतीं घोरास्यां शिरसां स्रजं सुरुचिरा

शुन्गुलकेशावलिं स्रक्कास्रक्प्रवहां श्मशाननिलयां श्रुत्योः शवा
लंकृतिं श्यामांगीं कृतमेखलां शवकरैर्देवीं भजे कालिकाम्
मानसोपचारैः संपूज्य पाठं कुर्याद्यथा ॥ क्रीं काली क्रीं
करालीच कल्याणी कमला कला कलावती कलाढ्या च कलापू
ज्या कलात्मिका ७६ कलाहृष्टा कलापुष्टा कलाकाष्टा कलाक
रा कलाकोटिसमाभासा कलाकेलिप्रपूजिता ७७ कलामयी
कलाधारी कलापारा कलागमा । कलाधारा कमलिनी कर्कराक ९

रूपाकरी ७८ ककारवर्णसर्वांगीकलाकोटिविभूषिता ककार
कोटिगुणिताककारकोटिभूषणा ७९ ककारवर्णहृदयाककार
मनुमंडिता ककारवर्णनुकुटाककारवर्णभूषिता ककंकव
र्णरूपाककशाहृपरायणा ८० ककवीरस्फालरताकमलाकर
पूजिता कमलाकरनाथाचकमलाकररूपधृक् ८१ कमला
करसिद्धिस्थाकमलाकरपारदा । कमलाकरमध्यस्थाकमला
करतोषिता ८२ कथंकारपरालापाकथंकारपरायणा कथं

कारपदांतस्थाकथंकारपदाश्रयः ८३ कमलाक्षीकमलजाकम
10 लाक्षप्रपूजिता कमलाक्षवरोत्फुल्लाककाराकर्बुराक्षरा ८४ क
रताराकरच्छिन्नाकरप्रणामाकराग्रणीवा करसंख्याकररताकरदा
करपूजिता ८५ करतोयाकरामर्षाकरनासाकरप्रिया करप्रा
णाकरकज्जाकरकाकरकान्तरा ८६ करकाचलरूपाचकरकाच
लशोभिनी करकाचलपुत्रीचकरकाचलतोषिणी ८७ करका
चलदेहस्थाकरकाचलरक्षिणी करकाचलसन्मान्याकरकाच १०

लकारिणी ८८ करकाचलवर्षाढ्या करकालरंजिता करका
चलकांतारा करकाचलमालिनी । ८९ करकाचलशोभाढ्या कर
काचलरूपिणी करकाचलभोज्या च करामलकरूपिणी ९०
करामलकसंस्था च करामलकसिद्धिदा करामलकसंपूज्या क
रामलकतारिणी ९१ करामलककारी च करामलकमोचिनी
करामलकमाता च करामलकसेविनी ९२ करामलकवद्ध्येया
करामलकदायिनी कंजनेत्रा कंजगतिः कंजस्था कंजधारिणी ९३

कंजमालाप्रियकरी कंजरूपा च कंजजा कंजजातिः कंजरतिः
कंजहोमपरायणा ९४ कंजमंडलमध्यस्था कंजाभरणभूषिता
॥ कंजसम्मानिरता कंजोत्पत्तिपरायणा ९५ कंजराशिसमाकारा
कंजारण्यनिवासिनी करंजवृक्षमध्यस्था करंजवृक्षवासिनी ९६
करंजफलभूषाढ्या करंजारण्यवासिनी करंजमालाभरणाक
रवालपरायणा ९७ करवालप्रहृष्टात्मा करवालप्रियागतिः
करवालप्रियाकंठा करवालप्रहारिणी ९८ करवालमयीकर्म ॥

करवालप्रियाकरा कबंधमालाभरणा कबंधराशिमध्यगा ९९
कबंधकूटसंस्थाना कबंधानन्तभूषणा कबंधनादसंतुष्टा कबं
धासनधारिणी १०० कबंधगृहमध्यस्था कबंधवनवासिनी
कबंधकांचिकरणी कबंधराशिभूषणा १ कबंधमालाजयदा
कबंधदेहवासिनी कबंधासनमान्या च कपालमालधारिणी
२ कपालमालामध्यस्था कपालव्रततोषिता कपालदीपसं
तुष्टा कपालदीपरूपिणी ३ कपालदीपवरदा कपालकज्जलस्थि

12

ता कपालमालाजयदा कपालज्ञयनोषिता ४ कपालसिद्धिसं
तुष्टा कपालभोजनोद्यता कपालव्रतसंस्थाना कपालकमलाल
या ५ कवित्वामृतसारा च कवित्वामृतसागरा कवित्वसिद्धिसं
हृष्टा कवित्वदानकारिणी ६ कविसज्ज्ञा कविगतिः कविरूपा क
विप्रिया कविब्रह्मानंदरूपा कवित्वव्रततोषिता ७ कविमा
नससंस्थाना कविवांछाप्रपूरिणी कविकंठस्थिता कंकाकंठी
कंकविसर्जिदा ८ कज्जलाकज्जलादानमानसा कज्जलप्रिया १२

कपालकज्जलसमा कज्जलेशप्रपूजिता ९ कज्जलार्णवमध्या
स्थाकज्जलानंदरूपिणी कज्जलप्रियसंतुष्टाकज्जलप्रियतोषि
णी १० कपालमालाभरणाकपालकरभूषणा कपालकर
भूषाढ्याकपालचक्रमंडिता ११ कपालकोटिनिलयाकपा
लदुर्गकारिणी। कपालगिरिसंस्थानाकपालाचलवासिनी १२
कपालपात्रसंतुष्टाकपालार्घ्यपरायणा कपालार्घ्यप्रियप्रा
णाकपालार्घ्यपरायणा १३ कपालचक्ररूपाचकपालरूप

13
मातंगा कदलीकदलीरूपाकदलीवनवासिनी १४ कदली
कुसुमसंप्रीताकदलीफलमानसा कदलीहोमसंतुष्टाकदली
दलनोद्यता १५ कदलीगर्भमध्यस्थाकदलीवनसुंदरी कद
लीदलरूपाचकदलीदलवासिनी १६ कदलीदलसंप्रीताक
दलीदलमानसा कदंबकुसुमनिलयाकदंबवनमध्यगा १७
कदंबकुसुमामोदाकदंबवनतोषिणी कदंबकुसुमसंपूज्याकदं
बकुसुमहोमदा १८ कदंबकुसुममध्यस्थाकदंबफलभोजिनी १९

कदंबकाननांतस्थाकदंबाचलवासिनी १९ कच्छपाकच्छपगतिः
कच्छपासनसंस्थिता कर्णपूराकर्णनासाकर्णाटीकालभैरवी २०
कालपीताकलहदाकलहाकलहातुरा कर्णरक्षीकर्णवार्त्ता
कथनीकर्णसुंदरी २१ कर्णपिशाचिनीकर्णमंजरीकपिकच्छु
दा कपिकच्छपिरूपाढ्याकपिकच्छुस्वरूपिणी २२ कस्तूरीमृ
गसंस्थानाकस्तूरीमृगरूपिणी कस्तूरीमृगसंतोषाकस्तूरी
मृगमध्यगा २३ कस्तूरीरसनीलांगीकस्तूरीगंधतोषिता

14

कस्तूरीपूजकप्राणा कस्तूरीपूजकप्रिया २४ कस्तूरीप्रेमसंतु
ष्टा कस्तूरीप्रेमधारिणी कस्तूरीपूजकानंदा कस्तूरीगंधरूपि
णी २५ कस्तूरीमालिकारूपा कस्तूरीपूजनप्रिया कस्तूरी
तिलकानंदा कस्तूरीतिलकप्रिया २६ कस्तूरीहोमसंतुष्टा क
स्तूरीतर्पणोद्यता कस्तूरीमार्जनोद्युक्ता कस्तूरीचक्रपूजिता
२७ कस्तूरीपुष्पसंपूज्या कस्तूरीचर्वणोद्यता कस्तूरीगर्भम
ध्यस्था कस्तूरीवस्त्रधारिणी २८ कस्तूरिकामोदरता कस्तू १४

रीवनवासिनी कस्तूरीवनसंभवस्था कस्तूरीप्रेमधारिणी क॰
स्तूरीशक्तिनिलया कस्तूरीकुंडमध्यगा कस्तूरीकुंडसंस्नाता
कस्तूरीकुंडमज्जना २० कस्तूर्यर्चनसंतुष्टा कस्तूरीजीवधारि
णी कस्तूरीपरमामोदा कस्तूरीजीवनक्षमा २१ कस्तूरीजाति
भावस्था कस्तूरीगंधचुंबना कस्तूरीगंधसंशोभिविराजितक
पालभूः २२ कस्तूरीमदनांतस्था कस्तूरीमदहर्षदा कस्तूरि
काविनानाढ्या कस्तूरीगृहमध्यगा २३ कस्तूरीस्पर्शकप्राणा

कस्तूरीनिंदकांतका कस्तूर्यामोदरसिका कस्तूरीक्रीडनोद्यता
15 २४ कस्तूरीदाननिरता कस्तूरीवरदायिनी ॥ कस्तूरीस्थापना
सक्ता कस्तूरीस्थानरंजनी २५ कस्तूरीकुशलप्रश्ना कस्तूरी
स्तुतिवंदिता कस्तूरीवंधकाधारा कस्तूरीस्थानवासिनी २६
कहरूपा कहाध्याचकहानंदा कहात्मभूः कहसत्पा कहत्या।
ख्या कहहेषा कहात्मिका २७ कहमालाकंठभूषा कहमंत्र।
जपोद्यता कहनामस्मृतिपरा कहनामपरायणा २८ कहपारा १५

यणपराकहदेवीकहेश्वरी कहगोत्राकहाराध्याकहध्यानपरा
यणा ३९ कहमाताकहांतस्थाकहमंत्राकहेश्वरी कहहेतुःक
हानंदाकहनादपरायणा ४० कहतंत्राकहकहाकहचर्चापरा
यणा कहाचाराकहगतिःकहतांडवकारिणी ४१ कहारण्या
कहरतिःकहशक्तिपरायणा। कहराज्यरताकर्मसाक्षिणीकर्म
सुंदरी ४२ कर्मविद्याकर्मरतिःकर्मतंत्रपरायणा कर्ममात्रा
कर्मगात्राकर्मधर्मपरायणा ४३ कर्मरेखानाशकर्त्रीकर्मरेखा

विनोदिनी कर्मरेखा मोहकरी कर्मकीर्त्तिपरायणा ४४ कर्म-
विद्याकर्मसारा कर्मधारा च कर्मभूः कर्मकारी कर्मकरी कर्मकौ-
तुकसुंदरी ४५ कर्मकाली कर्मतारा कर्मछिन्ना च कर्मदा क-
र्मचंडालिनी कर्मवेदमाता च कर्मभूः ४६ कर्मकांडरतानंता क-
र्मकांडानुमानिता कर्मकांडपरीणाहा कमठी कमठाकृतिः
४७ कमठाराध्यहृदया कमठाकंठसुंदरी कमठासनसंसेव्या
कमठी कर्मतत्परा ४८ करुणाकरकांता च करुणाकरवंदि- १८

ता कठोरा करमाला च कठोरकुचधारिणी ४९ कपर्दिनीक
पटिनीकठिनीकंठभूषणा करभोरूः कठिनदा कलभाकल
भालया ५० कलभावमयीकल्पाकल्पनाकल्पदायिनी क
मलस्थाकलामालाकमलास्याकलप्रभा ५१ ककुद्मिनीक
ष्टवतीकष्ठाकष्ठार्दिताकचा॥कचार्चिताकचतनुः कचसुंद
रधारिणी ५२ कठोरकुचसंलग्नाकटिसूत्रविराजिता क
र्णभक्षप्रियाकंदाकथाकंदगतिः कलिः ५३ कलिघ्नीकलि

17

हतीचककविनायकप्रजिता कमाकस्तनियंताचकश्चित्कविवर्ति

ता कर्वीचकर्द्रिकाभूषाकरणीकरणशत्रुपा करणेशीकरणदा

करणंबाकलानिधिः ५५ कलदाकलनाधाराकटिकाकरका

करा कलगेयाकर्कराशिःकर्कराशिप्रपूजिता ५६ कन्याराः

शिःकन्यकाचकन्यकाप्रियभाषिणी कन्यादानकरानंदाकं

न्यादानगृहेष्टदा ५७ कन्यकादानसंतुष्टाकन्यादानप्रतो

षिणी कर्षणाकस्तदहनाकमितांगीकलामना ५८ करा

१७

मालानंदकर्त्री करमालाप्रतोषिता करमालाशयानंदा कर।
मालासमागमा ५९ करमालासिद्धिदात्री करमालाकरप्रिया
करप्रियाकररता करदानपरायणा ६० करानंदा कलिगतिः
कलिहृद्या कलिप्रसूः कलनादनिनादस्था कलनादवरप्रदा
६१ कलनादसमाजस्था कहोला च कहोलदा कहोलगेहसं
स्था च कहोलवरदायिनी ६२ कहोलकविताधारा कहोल
ऋषिमानिता कहोलमानसाराध्या कहोलवाक्यकारिणी ६३

18

कहोलगेहमध्यस्था कहोलवरकारिणी कर्त्तृरूपा कर्त्तृमयी
कर्त्तृमाता च कर्त्तरी ६४ कनीया कनकाराध्या कनीनाकमयी क
या कनीयानंदनिलया कनकानंदतोषिता । ६५ कनीनककरका
काष्ठा कथार्णवकरी कविः करिगम्या करिगतिः करिध्वजपरा
यणा ६६ करिनाथप्रिया कंठा कथानकप्रतोषिता कमनीया
कमनका कमनीयविभूषणा ६७ कमनीयसमाजस्था कमनी
यव्रतप्रिया कमनीयगुणाराध्या कपिला कपिलेश्वरी ६८ का। १८

पिलाराध्यहृदयाकपिलांबरदायिनी कपर्दलक्ष्मीस्वरूपाकपर्द
लक्ष्मीवरप्रदा ६९ कपर्दलक्ष्मीसिद्धिदात्रीकलहक्ष्मीस्वरूपिणी
कलक्ष्मीमन्त्रवर्णाचकहलक्ष्मीप्रसः कला ७० कवर्गाचकपाट
स्थाकपाटोत्पाटनक्षमा कंकालीचकपालाचकंकालप्रिय
भाषिणी ७१ कंकालभैरवाराध्याकंकालमानसस्थिता कंका
लमोहनिरताकंकालमोहदायिनी ७२ कलारात्रीकलुषहा
कलुषार्तिविनाशिनी कलिसन्ध्याकलादानाकशिपुःकश्यप

19 पार्विता ७३ कश्यपाकश्यपाराध्याकलिदर्पाकलेवरा कलेव
राकलिकचाकटवर्गाकरालिका ७४ करालभैरवाराध्याकराल
भैरवेश्वरी करालाकरुणाधाराकपर्दीशवरप्रदा ७५ कपर्दी
शप्रेमरताकपर्दिमालिकायुता कपर्दिजपमालाढ्याकरवीर
प्रसूनदा ७६ करवीरप्रियप्राणाकरवीरप्रपूजिता । कर्णिकार
समाकाराकर्णिकारप्रपूजिता ७७ करीषाग्निस्थिताकर्षाक
र्षमात्रसुवर्णदा कलशाकलशाराध्याकषायाकरिगानदा ७८ १९

कपिलाकलकंठीचकलिकल्पलतामता कल्पलताकल्पमा ४०
ताकथंक्षमाकरालता ७९ कथंकालविनिर्मुक्ताकालीकाल
प्रियाकलुः कामिनीकामिनीपूज्याकल्पकारीचकल्पभृः ८०
कर्पूरामोदरुचिराकर्पूरामोदधारिणी कर्पूरमालाभरणाक
र्पूरवासपूर्त्तिदा ८१ कर्पूरमालाजयदाकर्पूरार्णवमध्यगा क
र्पूरतर्पणरताकर्पूरवरधारिणी ८२ कपटेश्वरसंपूज्याकप
टेश्वररूपिणी कद्रूः कपिध्वजाराध्याकलायपुष्परूपिणी ८३

20

कलायपुष्परुचिरा कलायपुष्पपूजिता ककचाचकचाराध्या

कामिनीपुष्पधारिणी ९४ कामिनीपुष्पनिलया कामिनीपु

ष्पपूर्णिमा कामिनीपुष्पपूजार्हा कामिनीपुष्पभूषणा ९५

कामिनीपुष्पतिलका कामिनीगंडचुंबना कामिनीयोगसंतु

ष्टा कामिनीयोगदायिनी ९६ कामिनीकुंडसंमग्ना कामिनी

कुंडमध्यगा कामिनीमानसाराध्या कामिनीमानतोषिता

९७ कामिनीमानसंचारा कालिका कालकालिका कामा

चकामदेवीचकामेश्वीकामसंभवा ८८ कामभावाकामरताका
मार्त्ताकाममंजरी काममंजीरनिरताकामदेवप्रियंतरा ८९
कामकालीकामकलाकालीकामकलाभिधा कालिकामक
लाकालीकालानलसमप्रभा ९० कल्पान्तदहनाकांताकांता
रप्रियभाषिणी कालपूज्याकालरताकालमालाचकालिनी ९१
कालवीराकालघ्नाकालसिद्धाचकालदा कालांजनसमाका
ताकालांजननिवासिनी ९२ कालसंधिःकालसिद्धिःकारागृहवि

मोचिनी कादिविद्या कादिमाता कादिस्था कादिसुंदरी ५३ का

21 शी कांचीच कांचीशा कांचीशवरदायिनी क्लींबीजा चैव क्लीं बीजा

क्लींहृदयायनमस्तुता ५४ काम्या काम्यगतिः काम्यसिद्धिदात्रीचका

मभूः कामाख्या कामरूपाच कामचापविमोचिनी ५५ कामदेव

कलारामा कामदेवकलालया कालरात्रिः कामदात्री कांताराच

लवासिनी ५६ कामरूपा कामगतिः कामयोगपरायणा का

मसंमर्दनरता कामगेहविकासिनी ५७ कालभैरवभार्याचकाल 21

भैरवकामिनी कालभैरवयोगस्था कालभैरवभोगदा ९८ का
मयेन्द्रः कामदोग्ध्री काममाता च कांतदा काम्रुका कामुकाराध्या
काम्रुकानंदवर्धिनी ९९ कांतवीजा कार्त्तिकेया कार्त्तिकेयप्रपू
जिता कार्या कारणदा कार्यकारिणी कारणांतरा २०० कांति
गम्या कांतिमयी कांतिः कात्यायनी कचा काससाराच काश्मीरा
काश्मीराचारतत्परा १ कामरूपाचाररता कामरूपप्रियंवदा
कामरूपा कामसिद्धा कामरूपमनोमयी २ कार्त्तिकी कार्त्तिका

22

राध्याकांचनारप्रसूनभूः कांचनारप्रसूनाभाकांचनारप्रसूजिता ३
काचरूपाकाचभूमिः कांस्यपात्रप्रभोजिनी कांस्यध्वनिमयी काम
सुंदरीकामचुंबना ४ कामासुख्यप्रतीकाशा कामद्रुमसमागमा
कामसुख्याकामभूमिः कामपूज्याच कामदा ५ कामदेहाकामगे
हाकामराजपरायणा कामध्वजसमारूढा कामध्वजसमास्थिता
६ काश्यपीकाश्यपाराध्याकाश्यपानंददायिनी कालिंदीजलसं
काशाकालिंदीजप्रजिता ७ कादेवपूज्यानिरताकादेवपरमार्थ्य २२
ल

दा कर्मनाकर्मनाकाराकामकार्मनकारिणी ८ कार्मनत्रोटनक
रीकाकिनीकारणाह्वया काव्यामृताचकालिंगाकालिंगमर्दनोद्य
ता ९ कालागुरुविभूषाढ्याकालागुरुविभूतिदा कालागुरुसु
गंधाढ्याकालागुरुप्रतर्पणा १० कावेरीनीरसंप्रीताकावेरीतीरवा
सिनी कालचक्रभ्रमाकाराकालचक्रनिवासिनी ११ काननाका
ननाधाराकारुःकारुणिकामयी । काम्पील्यवासिनीकाष्ठाकाम
पत्नीचकामभूः १२ कादंबरीपानरताकथाकादंबरीकला कामवं

द्याचकामेशीकामराजप्रपूजिता १३ कामराजेश्वरीविद्याकामकौ
तुककौमुदी कांभोजजाकांक्षितदाकाम्याकांचनकारिणी १४
कांचनाद्रिसमाकाराकांचनाद्रिप्रदानना कामकीर्तिःकामकेशीका
लिकाकानराशया १५ कामभेदीचकामार्तिनाशिनीकामभूमिका
कालनिर्णाशिनीकाव्यवनिताकामरूपिणी १६ कामस्थाकामसंदी
प्तिःकाव्यदाकाव्यसुंदरी कामेशीकारणवराकामारिपूजनोद्यता
१७ कांचीनूपुरभूषाढ्याकुंकुमाभरणान्विता कालचक्राकालगतिः स्त्र

कालचक्रमनोभवा १८ ॐजमध्याॐजऊध्याॐजतुष्यप्रियाॐजा
ॐजमाताॐजाराध्याॐठां वरधारिणी १९ ॐजरस्थाॐशारता
ॐशेशायविलोचना ॐनटीॐशरीॐरुद्वाॐरंगीॐटज्ञाह्वया २०
ॐभीनसविभूषाचॐभीनसवधोद्यता ॐभ्रकर्णामनोल्लासाॐ
लचूडामणिःॐला २१ ॐलालशृहकन्याचॐलचूडामणिप्रिया
ॐलप्रज्याॐलाराध्याॐलप्रज्ञापरायणा २२ ॐलभूषातथाॐ
लिःकरवीगणसेविनी ॐलभ्रध्याॐलरताॐलभ्रध्यपरायणा २३

कुलवस्त्राकुलाराध्याकुलकुंडसमप्रभा कुलकुंडसमुल्लासाकुंड
पुष्पपरायणा २४ कुंडपुष्पप्रहसनाकुंडगोलोद्भवात्मिका कुंड
गोलोद्भवाधाराकुंडगोलमयीकुहूः २५ कुंडगोलमयप्राणाकुं
डगोलप्रपूजिता कुंडगोलमनूल्लासाकुंडगोलवरप्रदा २६ कु
लदेवरताकुल्याकुलसिद्धिकरोत्परा कुलकुंडसमाकाराकुल
कुंडसमानभूः २७ कुंडसिद्धिः कुंडऋद्धिः कुमारीपूजनोद्यता
कुमारीपूजकप्राणाकुमारीपूजकालया २८ कुमारीकामसंतु

ष्टाकुमारीस्रजकात्मिका कुमारीव्रतसंतुष्टाकुमारीव्रतधारिणी
२९ कुमारीभोजनप्रीताकुमारीचकुमारदा कुमारमाताकुलदाकु
लयोनिःकुलेश्वरी ३० कुललिंगाकुलानंदाकुलरम्याकुतर्कधृ
क कुंतीचकुलकांताचकुलमार्गपरायणा ३१ कुल्लाचकुरुकु
ल्लाचकुल्लकाकुलकामदा कुलिशांगीकुब्जिकाचकुब्जिकानं
दवर्धिनी ३२ कुलीनाकुंजरगतिःकुंजरेश्वरगामिनी कुलपा
लीकुलवतीतिस्लथैवकुलदीपिका ३३ कुलयोगेश्वरीकुंडाकुंकु

25

मारुणविग्रहा ॐ कुमानंदसंतोषा ॐ कुमार्णववासिनी २४
ॐ कुमाउत्तमप्रीता ॐ कुलभूः ॐ कुलसुंदरी ॐ कुरदंती ॐ कुमुदिनी ॐ कुला
ला ॐ कुलटालया २५ ॐ कुलटालयमध्यस्था ॐ कुलटासंगतोषिता
ॐ कुलटाचुंबनोद्युक्ता ॐ कुशावर्त्ती ॐ कुलार्णवा २६ ॐ कुलार्णवाचा
रसता ॐ कुंडली ॐ कुंडलाकृतिः ॐ कुमतिश्च ॐ कुलश्रेष्ठा ॐ कुलचक्रपरा
यणा २७ ॐ कूटस्था ॐ कूरदृष्टिश्च ॐ कुंतला ॐ कुंतलाकृतिः ॐ कुशला
कृतिरूपा च कूर्चबीजधरा चकः २८ ॐ कुंकुंकुंकुं शब्दरता ॐ।

क्रैं क्रौं क्रः परायणा क्रं क्रां क्रीं शाह्वनिलया ॐक्काराळयवासिनी ४९

ॐक्कारासंगसंयुक्ता ॐक्कारानंदविग्रहा ह्रूर्चरंभा ह्रूर्चबीजा ह्रू

र्चजाप्यपरायणा ५० ह्रलिनी ह्रलसंस्थाना ह्रूर्चकंठपरा

गतिः ह्रूर्चबीजभालदेशा ह्रूर्चमल्लकभूषिता ५१ ॐलहंद

गता ह्रूर्मा ह्रूर्माचलनिवासिनी ॐलबिंदुः ॐलशिवाॐशला

र्धपरायणा ५२ ॐलबिंदुमणिप्रस्या ॐॐमहितिनिवासिनी

ॐचमर्दनसंतुष्टा ॐचजाप्यपरायणा ५३ ॐचस्पर्शनसंतुष्टा

कुचालिंगनतत्परा कुगतिघ्नी कुबेराध्या कुचभूः कुलनायिका
४४ कुगायना कुचधरा कुगीता कुंददंतिका कुगेया कुहराभासा
कुगेयाकुघ्नदारिका ४५ कीर्त्तिः किरातिनी क्लिन्ना किन्नरा।
किन्नरीप्रिया क्रींकारी क्रींजपासक्ता क्रीं ह्रूं स्त्रीं मंत्ररूपिणी ४६
किर्मीरितदृशापांगी किशोराचो किरीटिनी कीटभाषा की
टयोनिः कीटमाता च केशदा ४७ किंशुका कीटभाषा च क्रिया
सारा क्रियावती कीकीशाहूपरा कां कीं कूं कैं कौं मंत्ररूपिणी ४८ २६

26

कांकींकूंकैंस्वरूपाचक्रःफट्मंत्रस्वरूपिणी केतकीभूषणानंदा
केतकाभरणान्विता ।४९ केकराकेशिनीकेशीकेशीसूदनत
त्परा केशरूपाकेशमुक्ताकैकेयीकौशिकीतथा ५० कैरवाकै
रवाह्लादाकेशराकेतुरूपिणी केशवाराध्यहृदयाकेशवासक्त
मानसा ५१ क्लैंव्यनिर्नाशिनीक्लैंचक्लींबीजजपतोषिता कोमल
लाकोमलाङ्गीचकोशाचकोशलातथा ५२ कोलापुरनिवासी
चकोलासुरविनाशिनी कोटरूपाकोटरस्थाकोधिनीकाकरूपि

27

णी ५३ कंकाचकोकिलाकोटिः कोटिमंत्रपरायणा कोटयनंत
मंत्रयुक्ता केरूपा केरलाश्रया ५४ केरलाचारनिपुणा केरलेंद्र
हस्थिता केदाराश्रमसंस्थाच केदारेश्वरपूजिता ५५ क्रोधरूपा
क्रोधपदा क्रोधमाला च कौशिकी कोदंडधारिणी क्रौंचा कौशर
ल्या कोसलांगना ५६ कौलिनी कौलिकाधारा कौलिकानन
वासिनी कौतुकी कौमुदी काला कौमारी कौरवार्चिता ५७
कौंडिनी कौशिली क्रोधज्वालाभास्वररूपिणी कोटिकालान २७

लज्वालाकोटिमार्तंडविग्रहा ५८ कालिकाह्वस्ववर्णाचकला
हत्याक्रियावरा कशांगीकलहकृत्याचकः फट्स्वाहास्वरूपिणी
५९ क्रौंक्रौंहूंफट्मंत्रवर्णाक्रींह्रींहूंफट्नमःस्वधा क्रींक्रींक्रीं।
ह्रींतथाहूंहूंफट्स्वाहामंत्ररूपिणी ६० १०००
इतिश्रीसर्वसाम्राज्यमेधानामसहस्रकं सुंदरीशक्तिदानाख्यं
स्वरूपाभिधमेवच ६१ कथितंदक्षिणाकाल्याः सुंदर्याः प्रीति
योगतः वरदानप्रसंगेनरहस्यमपिदर्शितं ६२ गोपनीयंसदा

भक्त्यापठनीयंपरात्परं प्रातर्मध्याह्नकालेचसंध्यार्धरात्रयोरपि
९३ सन्ध्याकालेजपान्तेचपठनीयंविशेषतः यःपठेत्साधकाधी
शःकालीरूपोहिवर्धतः ९४ पठेद्वापाठयेद्वापिशृणोतिश्राव
येदपि वाचकंतोषयेद्वापिसभवेत्कालिकातनुः ९५ सहेलंवा
सलीलंवायःकश्चिन्मानवःपठेत् सर्वदुःखविनिर्मुक्तस्त्रैलो(
क्यविजयीकविः ९६ मृतवंध्याकाकवंध्याकन्यावंध्याचवंध्य
का पुष्पवंध्याशीलवंध्याश्रुणुयात्स्तोत्रमुत्तमं ९७ सर्वसिद्धि २८

प्रदातारं स त्वकविं चिरजीविनं पुत्रं त्वं कीर्त्तिसुतं लभते नात्र संशयः ६८
यं यं काममुपस्कृत्य कालीं ध्यात्वा जपेत्स्तवं तं तं कामं करे कृत्वा
मंत्री भवति नान्यथा ६९ योनितुष्टैर्लिंगपुष्पैः कुंडगोलोद्भवैरपि
संभोगस्यतु पुष्पैश्च वस्त्रैर्देवीप्रसन्नकैः ७० कालीतुष्टैः पीठ
तोयैर्योनिक्षालनबिंदुभिः कस्तूरीकुंकुमैर्देवि नवकालागुरूक
मात् ७१ अष्टगंधैर्धूपदीपैर्जपायावकसंयुतैः रक्तचंदनसिंधू
रैर्मत्स्यमांसादिभूषकैः ७२ मधुभिः पायसैः क्षीरैः शोधितैः शो

29

णैरपि महोपचारैः रक्तैश्चनैवेद्यैः षडङ्गसान्वितैः ७३ पूजयित्वा
महाकालीं महाकालेन लालितां विद्याराज्ञीं कुल्लुकां च जप्त्वा स्तो
त्रं पठेच्छिवे ७४ कालीभक्तस्त्वेकचित्तः सिंदूरतिलकान्वितः
तांबूलपूरितमुखो मुक्तकेशो दिगंबरः ७५ शवयोनिस्थितो
वीरः श्मशानस्तरतान्वितः शून्यालये बिंदुपीठे उष्माकीर्णे शिवा
वने ७६ शयनोप्यथ संजानः कालीदर्शनमाप्नुयात् तत्त्वयद्य
त्कृतं कर्म तदनंतफलं भवेत् ७७ ऐश्वर्यं कमला साक्षात्सिद्धोघ्री २९

कालिकांबिका कविर्लेनारिणीन्नल्पः सौंदर्येस्तुंदरीसमः ७८
वसोर्धाराससमः काव्येस्तुतौस्तुतिर्धरोयथा ब्रह्मास्त्रमिवड्रर्धर्षे
स्त्रैलोक्यविजयास्त्रवित् ७९ शत्रुहंताकाव्यकर्त्ताभवेच्छिवसमः
कलौ दिग्विदिक्ंडकर्त्ताचदिवारात्रिविपर्ययात् ८० महादेव
समोयोगीत्रैलोक्यस्तंभनेक्षणात् गानेचतुम्बुरुःसाक्षाद्दानेक
र्णसमोभवेत् ८१ गजाश्वरथपत्तीनांमंत्रिणामधिपःक्षती श्रा
द्धेष्वचभुस्तंडीवजरापलितनाशकः ८२ वर्षषोडशवान्भूयास

ईकालंमहेश्वरि ब्रह्मांडगोलेदेवेशिनतस्यदुर्लभंक्वचित् ८३
सर्वहत्यागतंध्यात्वात्रकार्याविचारणा कुलेश्वर्युतंदृष्ट्वातत्रका
लींविचिंतयेच्च ८४ विद्याराज्ञींचसंप्रजप्यपठेन्नामसहस्रकं मनो
रथमयींसिद्धिस्तस्यहस्तेसदाभवेत् ८५ परदारान्समालिंग्यसं
चुंब्यपरमेश्वरि हत्याहत्यिकयायोगंकृत्वाजप्यास्तवंपठेत् ८६
योनिंवीक्ष्यजपेत्स्तोत्रंकुबेरादधिकोभवेत् कुंडगोलोद्भवंवीक्ष्य
पर्णाकेहोमयेन्निशि ८७ पितृभूमौमहेशानिविधिरेखांप्रमार्ज्य

येत् तरुणींचंचलांरम्यांसुंदरींकामगर्वितां ७८ समानीयप्रय
त्नेनसंशोध्यन्यासयोगतः प्रसूनमंचेसंस्थाप्यहृष्टींविकसितां
चरेत् ७९ मूलचक्रंतुसंभाव्यदेव्यावरणसंयुतं संपूज्यपरमेशा
नींस्वबलांतंमहेश्वरि ८० जप्त्वास्तुत्वामहेशानिद्राविणींसंस्म
रेच्छिवे अष्टोत्तरशतंयोनिंसंमंत्र्यचप्रयत्नतः ८१ संयोगीभूय
जप्तव्यंसर्वविद्याधिपोभवेत् शून्यागारेशिवारम्येशिवदेवाल
येतथा ८२ शून्यदेशेतडागेचगंगागर्भेचतुष्पथे श्मशानेपर्व

३१

न्यग्रोधे चैकलिंगे शिवालये ९३ मुंडयोनौ करन्वस्याता गेहे वेश्यागृहे
तथा कुट्टिनी गृहमध्ये वा कदलीमंडपे सदा ९४ पठेत्सहस्रना
माख्यं स्तोत्रं सर्वार्थसिद्धये अरण्ये पशुन्यदुर्गे भ्रुरणे शक्तिसमागमे
९५ कालीं संचिन्त्य प्रजपेदेतन्नामसहस्रकं सर्वसिद्धीश्वरो भूया
द्धाविष्टा सिद्धिं संविंदति ९६ मृडच्छकयोर्मंडेल्वचिवाकोमलेपि
च विष्टरे शवकस्वेवा ऽप्युध्यावस्त्रासनेपिवा ९७ कालीं संचिन्त्य प्र
जपेदिदं नामसहस्रकं पंचानंदमयो भूत्वा पठित्वा कालिकात्म ३१

के १८ मुक्तकेशो दिग्वासो मैथुनीशायनस्थितः जप्त्वा काली
पठेत्स्तोत्रं खेचरीसिद्धिभाग्भवेत् १९ नवम्यां मंगलदिने तथा कृ
ष्णे तिथौ शिवे कुलद्रव्येण जप्त्वैनं पठेन्नामसहस्रकं २०० चिक्रे
योगमासाद्य शुक्रोत्सारणमेव च जप्त्वा श्रीदक्षिणां कालीं शक्ति
पानशतं लभेत् १ ततः स्वशक्तिं पश्यन्ने पठेदापि परमद्वादशिनं यन्त्रपि आ
लोकयेद्दिशावासां परशक्तिं विशेषतः २ स्मृत्वा श्रीदक्षिणां १
कालीं योनिं स्वकरगां चरेत् पठेन्नामसहस्रं यः शिवादप्यधिको भ

वेत् ३ लतांतरेभ्यर्च्य सम्यक्स्तुत्वा कालीं निराकुलः दशावधानो भव
ति मासमात्रेण साधकः ४ कालरात्र्यां महारात्र्यां वीररात्र्यामपि प्रि
ये मोहरात्र्यां चतुर्दश्यामष्टम्यां संक्रमेपि च ५ ग्रहणेंदुसूर्यकेषु
भौमावस्यां निशायुवे स्वदर्शनो भवेदाशु किन्नरैः सिद्धिभाग्भवेत्
६ पश्चिमाभिमुखं देवलिंगं वृक्षशून्यं पुरातनं तत्रस्थित्वा जपेत्स्तोत्रं
सर्वकामाप्तये शिवे ७ भौमवारे निशीथे च अमायां वैश्यभूदिने
माषभक्तबलिं छागं कृसरान्नं च पायसं ८ दग्धमीनं शोणितं च द

पिंडुगंधंगुडाद्रकं बलिंदत्वाजपेन्नत्वहोत्तरशतंप्रिये ९ देवगंधा
र्वसिद्धौघैःसेवितःस्वरसुंदरीः लभेद्देविमासेनेनतस्याश्चासनसंह
तिः १० हस्तत्रयंभवेदूर्ध्वंनात्रकार्याविचारणा हेलयालीलयाभ
क्त्याकालींस्तौतिचमानवः ११ ब्रह्मादीन्स्तंभयेद्देविमोहेत्स्त्रीमोह
येत्क्षणात् आकर्षयेन्महाविद्यांदशसर्वांस्त्रियामतः १२ नवीन
विस्मुनिर्माणंयमादीनांतुमारणं ध्रुवमुच्चाटयेन्नूनंसृष्टिंचनूतना
चरेत् १३ मेषमाहिषमार्जारखरछागनरादिभिः खड्गसूकरका

33

पोतैर्टीटिकैः शाष्ठाकैः पलैः १४ शोणितैः सास्थिमांसैश्च कारणैर्दु
ग्धपायसैः कादंबरीसिंधुमत्स्यैः स्वराष्ट्रैश्चमासवैः १५ योनिस्था
लितनीरैश्च योनिलिंगामृतेनच स्वजातकुलमैः स्वयंजपालेतर्पये
च्छिवां १६ सर्वसाम्राज्यनामानं त्वत्वानत्वाचशक्तिभिः शाक्तमाला
पेपठेत्स्तोत्रं कालीरूपोदिनत्रयात् १७ दक्षिणाकालिकातस्य दे
हे तिष्ठति नान्यथा वेश्यालताशृहेगत्वा तस्याश्रुवननतत्परः १८
तस्यायोनौस्तुत्वंदत्वा तद्रसं विलिह्य जपेत् तदंतेनामसाहस्रं पठेद्भक्ति ३३

परायणः १९ कालिकादर्शनेनैतस्य भवत्येव त्रियामतः न्नत्यपात्रं ग्र

हेगत्वा मकारपंचकान्वितः २० प्रसन्नमंत्रे संस्थाप्य शक्तिं न्यासपरा

यणः पात्राणां साधनं कृत्वा दिग्वस्त्रां तां समाचरेत् २१ चक्रं तन्मूले

संभाव्य तत्र सावरणं यजेत् शतं भाले शतं केशे शतं सिंधूरमंडले २२

शतं हृदयं कुचद्वंद्वे शतं नाभौ महेश्वरि शतं योनौ महेशानि उन्यायच शा

नत्रयं २३ जपेत्तत्र महेशानि नंदने प्रजपेत्ततः शतावधानो भवति

मासमात्रेण साधकः २४ मातंगिनीं समानीय किं वा कापालिकीं शि

वे दंतमालाजपे कार्या गले धार्या नृमुंडजा २५ नेत्रपद्मे योनिचक्रे श
क्तिवक्त्रे स्ववक्त्रके कृत्वाजपेन्महेशानि मुंडयंत्रं प्रपूजयेत् २६ मुंडा
सनस्थितो वीरो मकारपंचकान्वितः अन्यामालिंग्य पूजयेदन्यां सं
चुंब्य वै पठेत् २७ अन्यां संपूजयेत्तत्र अन्यां संमर्दयन् पठेत् अन्यायो
नौ शिवं दत्वा पुनः सर्ववदाचरेत् २८ अवधानः सहस्रं तु शक्तिपा
नशतेषु च राजा भवति देवेशि मासपंचकयोगतः २९ यवनीश
क्तिमानीय मानवः शक्तिपरायणः कुलाचारक्रमेणैव तस्या योनिं विका ३४

मयेत् ३० तत्रजिह्वांप्रदत्वाचपठेन्नामसहस्रकं एकपालेतत्रदी।
पंलाप्ययत्नेनवैपठेत् ३१ महाकविवरोभूत्वाजीवेद्वर्षशतंकृती
कामार्त्तोशक्तिमानीययोनौमूलचक्रकं ३२ विलिख्यपरमेशा।
नितन्मंत्रंलिखेच्छिवे उल्लिहन्प्रजपेद्देविसर्वशास्त्रार्थतत्ववित् ३३
अश्रुतान्यपिशास्त्राणिवेदादीन्वाचयेद्ध्रुवं विनाभ्यासैर्विनान्यासै।
र्विनापाठादिभिःप्रिये ३४ चतुर्वेदाधिपोभूत्वात्रिकालज्ञस्त्रिवर्षतः
चतुर्विधंचपांडित्यंतस्यहस्तगतंक्षणात् ३५ शिवाबलिःप्रदातव्यःस

वेदाभ्यन्यमंडले कालीध्यानेमंत्रचिंतानीलसाधनमेवच २६ स
35 हस्रनामपाठश्चकालीनामसुकीर्तनं सिंदूरतिलकोदेविवेश्या
लापोनिरंतरं २७ वेश्यागेहेनिशाचारोराज्ञौपर्यटनंतथा नग्न।
स्यकृत्यमेतावदन्यदभ्युदयंविदुः २८ वीरसाधनकंकर्मशिवाप्र
ज्ञाबलिस्तथा शक्तिप्रज्ञायोनिदृष्टिःखड्गहस्तोदिगंबरः २९
मुक्तकेशोदिशावासस्तांबूलपूरिताननः कालीभक्तोभवेद्देवि।
नान्यथात्क्षोभमाप्नुयात् ४० दुग्धास्वादीयोनिलेहीसंविदासवद्ध्

र्गिनः वेश्यालतासमायोगान्मासात्कल्पलतास्वयं ४१ वेश्याच
क्रसमायोगात्कालीचक्रसमः स्वयं वेश्यादेहसमायोगात्कालीदे
हसमः स्वयं ४२ वेश्यामध्यगतेवीरं कदापश्यामिसाधकं एवंव
दतिसाकालीतस्माद्वेश्यावरांगना ४३ वेश्याकन्यांतथापीठजा
तिभेदक्रलक्रमात् अक्रलक्रमभेदेनज्ञात्वाचैवकुमारिकां ४४
कुमारींपूजयेन्मन्त्रीजपांतेदेववत्प्रिये पठेन्नामसहस्रंयः काली
दर्शनभाग्भवेत् ४५ भक्त्यापूज्यकुमारींतांवेश्याकुलसमुद्भवां व

36

स्वहेमादिभिस्तोयमजस्वास्तोत्रंपठेच्छिवे ४६ त्रैलोक्यविजयीभूया
दमाचंद्रग्रदर्शकः यद्यहन्तंकुमारीणांनदंनंतफलंलभेत् ४७ कु
मारीपूजनफलंमयावक्तुंनशक्यते चंचलाज्जदितेकिंचित्न्तंतव्यम
यमंजलिः ४८ एकाचेत्पूजिताबालाद्वितीयंपूजितंभवेत् कुमा
र्यश्चशाक्तयश्चसर्वमेतच्चराचरं ४९ शक्तिमानीयतज्जात्रेन्यासजा
लंप्रविन्यसेत् स्ववामभागेसंस्थाप्यपठेन्नामसहस्रकं ५० सर्व
सिद्धीश्वरोभूयान्नात्रकार्याविचारणा श्मशानस्थोभवेत्स्वस्थो

गलितंचिकुरंचरेत् ५१ दिगंबरःसहस्रंचस्वर्णपुष्पंसमानयेत् स्व
वीर्येणाप्लुतंकृत्वाप्रत्येकंजुहुयाज्जपन् ५२ मज्जध्यात्वामहाभक्त्या।
त्तमापालोनरोभवेत् नवकेशंस्ववीर्यंचयत्नात्संमार्जनीगतं ५३
मुक्तकेशोदिशावासामूलमंत्रपुरःसरं ऊर्जवारेमध्यरात्रौहोमं
कुर्यात्स्मशानके ५४ पठेन्नामसहस्रंयःपृथ्वीशाकर्षणंचरेत्
पुष्पयुक्तेभगेदेविसंयोगानंदतत्परः ५५ नग्नश्चिकुरमासाद्यमूल
मंत्रंजपन्प्रिये चितावह्नौमध्यरात्रौवीर्यप्लुतंस्मारयेद्यत्नतः ५६ का।

37

लिकांपङ्कजयेँल्लज्ञपठेन्नामसहस्रकं पृथ्वीशाकर्षणंकुर्यान्नात्रकार्या
विचारणा ५७ कदलीवनमासाद्यलक्षमात्रंजपेत्प्रिये मधुमत्या
स्वयंदेव्यासेव्यमानःस्मरोपमः ५८ नाम्नामधुमतीत्युक्तातथास्था
वरजंगमं आकर्षणीसमुच्चार्यठठस्वाहांसमुच्चरेत् त्रैलोक्याकर्ष
णीविद्यातस्यहस्तेसदाभवेत् मधुमतीस्थावरजंगमा
कर्षणीठठस्वाहा नंदीश्वरीचरत्नानिहेमस्त्रीशैलभूरुहान् आ
कर्षयत्यंबुनिधेःस्वमेरोश्चदिगंततः अलभ्यानित्ववस्तूनिदूरा। रा

ङ्गमिनलादपि ६१ वृत्तांतंचतुरिस्थानां रहस्यं विद्विषामपि राज्ञां
च कथयत्येषसत्यं मन्त्ररमाविशेत् ६२ द्वितीयवर्षपाठेन भवेत्प
द्मावतीपतिः ॐ ह्रीं पद्मावति पदं ततस्त्रैलोक्यनाम वार्त्ताम् ६३
कथयद्वंद्वमुच्चार्य स्वाहांतो मंत्र ईरितः ॐ ह्रीं पद्मावति।
त्रैलोक्यनामवार्त्तां कथय कथय स्वाहा। ब्रह्मविष्णुशिवादीनां त्रै
लोक्यं याहृशी भवेत् ६४ सर्वं वदति देवेशि त्रिकालज्ञः कविः प्रभुः
त्रिवर्षपठनाद्देवि लभेद्भोगवतीकलां ६५ महाकालेन दृष्टोपि वि

त्राध्वगतोपिच तस्यदर्शनमात्रेणचिरंजीवीनरोभवेत् ६६ मृत
38 संजीविनीत्वत्कामृतस्तस्य्यापयद्वयं स्वाहांतोमन्त्रराख्यातःस्वप्नसि
द्धोभवेत्ततः ६७ मृतसंजीविनिमूलमन्त्यापयोत्थापयस्वा
हा ॐ ह्रीं स्वप्नवाराहिचकालिस्वप्नेकथयचोद्धरेत् अमुकस्यात्र
कंदेहिक्रींस्वाहांतोमन्त्रमतः ६८ स्वप्नसिद्धिरधुनवक्ष्यामिस्यस्वप्ने
सदास्थिता ॐ ह्रीं स्वप्नवाराहिकालिस्वप्नेकथयथात्रक
स्यात्रकंदेहिक्रींस्वाहा चतुर्वर्षस्यपाठेनचतुर्वर्गाधिपोनरः ६९ २८

तद्वत्स्वजलसंयोगाद्भूतः काव्यं करोति च तस्य वाक्यपरिचयान्मूर्तिर्वदति भारती ७० प्रस्तरे त्वकरं कृत्वा वदवाणीमिति ब्रुवन् साधको वांछयाकर्षैस्तत्तदर्थं भविष्यति ७१ ब्रह्मांडगोलके यावत्‌ या काचिज्जगतीतले समस्ताः सिद्धयो देवि करामलकवद्भवेत् ७२ साधकस्य स्मृतिमात्रेण यावन्त्यः सन्ति सिद्धयः स्वयमायान्ति पुरतो जयादीनां तु का कथा ७३ विदेशवर्तिनो जीवाः स्वयमायान्ति चिंतिताः शोणितैः सास्थिमांसैश्च मकारैर्दुग्धपायसैः ७४ संपूज्य संस्मरेद्देवीं

39

त्रैलोक्यविजयीभवेत् अमायांचंद्रसन्दर्शी चंद्रग्रहणमेवच ७५
अष्टम्यांपूर्णचंद्रत्वंचंद्रसूर्याष्टकंतथा अष्टदिक्षुतथाचाष्टौकरो
म्येवमहेश्वरि ७६ अणिमादिचरत्वंचचराचरपुरीगतिः पादुका
खड्गवेतालयक्षिणीगुह्यकादयः ७७ तिलकोगुप्तताहश्यचरा
चरकथानकं मृतसंजीविनीसिद्धिगुटिकाचरसायनं ७८ उड्डी
नसिद्धिर्देवेशिपादुसिद्धीश्वरत्वकं तस्यहस्तेभवेद्देविनात्रका
र्याविचारणा ७९ केनौवाडुंडुभौवस्त्रंविनानैवष्टनैगृहे भिन्नो ३९

चफलकेपीठेलेख्यंरुद्रं प्रयत्नतः ८० मध्येचक्रंदशांगोल्यंपरि
तोनामलेखनं तद्धारणान्महेशानि त्रैलोक्यविजयीभवेत् ८१
एकोहिशतसाहस्रान्निर्जित्यचरणाजिरे पुनरायातिवस्वयंस्वगृ
हंप्रतिपार्वति ८२ एकोहिशतसंदर्शीलोकानांभवतिध्रुवं क
लशंस्थाप्ययत्नेनयोनामसहस्रंपठेत् ८३ सेकःकार्योमहेशानि
सर्वापत्तिनिवारणः भूतप्रेतग्रहादीनांराक्षसान्ब्रह्मराक्षसान् ८४
वेतालान्भैरवांश्चैवस्कांदान्वैनायकादिकान् नाशयेत्क्षणमात्रेण

40

नात्रकार्याविचारणा ८५ भस्माभिमंत्रितंकृत्वाग्रहग्रस्तेविलेपये
त् भस्मसंलेपनादेवसर्वग्रहविनाशनं ८६ नवनीतंचाभिमंत्र्यस्त्री
णांदद्याद्विचक्षणः कंठेवावामबाहौवायोनौवाधारणान्प्रिये ८७
बहुपुत्रवतीनारीसुभगाजायतेध्रुवं पुरुषोदक्षिणांगेचधारयेत्स
र्वसिद्धये ८८ कंठेबाहौचशिरसिहृदयेनाभिगोचरे कटिस्था
नेशिखायांवाधारयेत्सर्वसिद्धये ८९ बलवान्कीर्तिमान्धन्योधा
र्मिकःसाधकःकृती बहुपुत्रीरयानांचगजानामधिपःसुखी ९० 40

कामिन्याकर्षणेयुक्तः क्रींचदक्षिणकालिके क्रींस्वाहाप्रजपेन्मंत्र

मयुतंनामपाठकः ९१ आकर्षणंभवेद्देविजलखेचरभूगतम्

क्रींदक्षिणेकालिकेक्रींस्वाहा वशीकरण

कामोहिहूंहूंह्रींह्रींचदक्षिणे ९२ कालिकेसर्वबीजानिसर्ववश्यक

पेन्नरः उर्वशीमपिवशयेन्नात्रकार्याविचारणा ९३ हूंहूं

ह्रींह्रींदक्षिणेकालिकेहूंहूंह्रींह्रीं क्रींदक्षिणेकालिकेचस्वाहायुक्तं

चवंजपेत् क्रींदक्षिणेकालिकेस्वाहा

पठेन्नामसहस्रंतुत्रैलोक्यंवशयेद्ध्रुवं ९४ नदेयंसहस्रनामाख्यं
स्वयंकाल्याप्रकाशितं वैष्णवायविशुद्धायशिवायबलिरतायच ९५
सत्यव्रतायप्रदातव्यंविद्याराज्ञीप्रवेदिने स्वविनीतायशांतायदांताया
तिगुणायच ९६ भक्तायज्येष्ठपुत्रायगुरुभक्तिपरायच भक्तभक्ता
ययोग्यायशक्तिभक्तिपरायच ९७ वेश्यास्रजनपुत्रकायकुमारीपूज
कायच दुर्गाभक्तायशैवायमहाकालप्रजापिने ९८ अद्वैतभा
वयुक्तायकालीभक्तिपरायच गुरुदेवतमंत्राणांमहेशास्यापिपा ५१

वेति ९९ अभेदेनस्मरेन्मंत्रंसशिवोनात्रसंशयः योमंत्रंभावयेन्मंत्रीस
शिवःसगणाधिपः ५०० सशाक्तोवैस्मवःमोरूपएवसर्णादीक्षितः अ
योग्यायनदातव्यंसिद्धिरोधःप्रजायते १ वेश्यास्त्रीनिंदकायाथक्ष
त्रासंविन्मनिंदिने ह्रराञ्जवीमत्रंस्मृत्वाहराचारोवरिष्यति २ वा
म्हणायाचवोरेचपरमघोरेचहुंवदेत् घोररूपेनथाघोरञ्जरवभी
मपदंवदेत् ३ भीषणञ्जकंषष्ठ्यांतंहेहेतंचमत्तुगंपिव शिववद्ग्नि
युगास्त्रंचहूंहःफट्चमत्तुर्भवेत् ४ एतस्याःस्मरणादेवषष्ठ्यांनास्या

च्छंखला ऐंह्नाघोरेपरमघोरेहूंघोररूपेघोररुविभीम
भीषणिग्रस्तुकस्यहेत्वंममपिवहरहरफट्हूंहः फट् अवतीर्णाभवे
हेविदुष्टानांमदनाशिनी ५ खलायपरतंत्रायपरनिंदापरायच भ्र
ष्टायदुष्टसत्वायपरवादपरायच ६ शिवाभक्तायदुष्टायपरदारप
रायच नस्तोत्रंदर्शयेद्देविशिवहत्याकरोभवेत् ७ कालिकानं
दहृदयःकालिकासक्तमानसः कालीभक्तोभवेत्सोपिधन्यरूपः
सएवतु ८ कलौकालीकलौकालीकलौकालीतुकेवला का ५२

लीकालीकालीकालीकालीकालीनकेवला ९ क्लौंकालीक्लौं।
कालीक्लौंकालीवरप्रदा बिल्वपत्रसहस्राणिकरवीराणिवैतथा
१० प्रतिनाम्नाप्रपूजयेद्धितेनकालीवरप्रदा कमलानांसहस्रंतुप्रति
नाम्नासमर्पयेत् ११ चक्रंसंपूज्यदेवेशिकालिकावरमाप्नुयात् मंत्र
तोभ्युक्षितोदेविकलशस्यजलेनच १२ नाम्नाप्रसिंचयेद्देविसर्वद्वा
भविनाशकृत् तथामदनकेदेविसहस्रमाऽहुतीर्व्रती १३ सहस्र
नाम्नासंपूज्यकालीवरमवाप्नुयात् चक्रंविलिख्यदेहस्थंधारये

त्कालिकामंत्रं १४ कालीनिवेदितं यद्यत्तत्सर्वं भक्षयेच्छिवे दिव्यदे
हधरो भूत्वा कालीपार्श्वस्थितो भवेत् १५ नैवेद्यनिंदकान्दुष्टान्दृष्ट्वा
नृत्यंति भैरवाः योगिन्यश्च महावीरा रक्तपानोद्यताः सदा १६ मांसा
स्थिचर्वणं कृत्वा भक्षयंति न संशयः तस्मान्न निंदेन्मनसा कर्मणा वच
सा किमु १७ अन्यथाज्ञकृते यस्तु तस्य पातो भविष्यति क्रमदीक्षा
विहीनस्य सिद्धिर्भवति नान्यथा १८ मंत्रज्ञो भक्ष्यवाक्यात्क्षीणा
युर्वा भवेद्ध्रुवं मंत्रज्ञो भैरवो भूत्वा क्रमदीक्षाविवर्जितः १९ ब्रह्महा ५२

रीचस्त्रीहारीराज्यहारीभवेद्ध्रुवं क्रमदीक्षाञ्जनोदेविक्रमाद्राज्यमवा
प्नुयात् २० एकवारंपठेद्देविसर्वपापविनाशने द्विवारंपठतेदेविवां
छासिद्धिमवाप्नुयात् २१ त्रिवारंचपठेद्यस्तु वागीशासमतांव्रजेत्
चतुर्वारंपठेद्देवि चतुर्वर्णाधिपोभवेत् २२ पंचवारंपठेद्देविपंचका
माधिकोभवेत् षड्वारंचपठेद्देवि त्वैश्वर्यमयोभवेत् २३ सप्तवारं
पठेद्देविकामनांचिंतितांलभेत् अष्टवारंपठेद्देविदिगीशोभवति।
ध्रुवं २४ नववारंपठेद्देविनवनाथसमोभवेत् दशवारंकीर्मयेद्यो।

44

दशाहःखेचरोभवेत् २५ दशासहस्रावर्त्तानांभवेद्दशामखेश्वरः पंच
विंशसाहस्रेणचतुर्विंशतिसिद्धिभाक् २६ लक्षावर्त्तनमात्रेणल
क्ष्मीपतिसमोभवेत् लक्षत्रयावर्त्तनात्तुमहादेवंविजेष्यति २७ ल
क्षपंचकमात्रत्यकलापंचकसंयुतः दशलक्षावर्त्तनात्तुदशविद्याधि
रूपमा २८ पंचविंशतिलक्षैस्तुदशविद्येश्वरोभवेत् पंचाशल्लक्षमा
हात्म्यमहाकालसमोभवेत् २९ कोटिमावर्त्तयेद्योहिकालीपशुपति
चक्षुषा वरदानोद्युक्तपरांमहाकालसमन्वितां ३० प्रत्यक्षंपशुपति ४४

शिवेतस्यदेहेवसेद्ध्रुवं श्रीविद्यांकालिकांतारांत्रिशक्तिविषयंपठे
त् ३१ त्रिशक्तिविषयेदेविक्रमदीक्षाप्रकीर्त्तिता क्रमदीक्षायुतोदे
विराज्ञाभवतिनिश्चितं ३२ क्रमदीक्षाविहीनस्यसिद्धिहानिःपदेप
दे अहोधन्यवतांमध्येधन्यःक्रमयुतःकलौ ३३ तत्रापिधन्योदे
वेशिनामसाहस्रपाठकः दशकालीविधौदेविस्तोत्रमेतत्सदापठे
त् ३४ सिद्धिंविंदतिदेवेशिक्रमदीक्षायुतोनरः क्रमदीक्षायुतो
देविराज्ञाभवतिनिश्चितं ३५ विधेर्लिपिंचसंमार्ज्यकिंकरत्वंविस्र

स्यच महाराज्यमवाप्नोतिनात्रकार्याविचारणा ३६ क्रमदीक्षाविः
हीनस्यफलंसर्वंभयोदितं क्रमदीक्षासमायुक्तःकालुकःसिद्धिभा
ग्भवेत् ३७ क्रमदीक्षायुतोदेविशिवएवनचापरः कलौकालीम
हाविद्याकलौकालीतुसिद्धिदा ३८ कलौकालीतुसिद्धाचक
लौकालीवरप्रदा कलौकालीसाधकस्यदर्शनार्थंसमुद्यता ३९
कलौकालीकेवलास्यान्नात्रकार्याविचारणा नान्यविद्यानान्यवि
द्यानान्यविद्याकलौभवेत् ४० कलौकालींविहायाथयःकश्चि ४५

त्सिद्धिकामुकः सनष्टःकिंविनादेविरतिसंभोगमिच्छति ४१ कलौ
कालींविनादेविनःकश्चित्सिद्धिमिच्छति सनीलसाधनंत्यक्ता।
परिश्रमतिसर्वतः ४२ कलौकालींविहायाथयःकश्चिन्मोक्षमि
च्छति गुरुध्यानंपरित्यज्यसिद्धिमिच्छतिसाधकः ४३ कलौकाली
विहायाथयःकश्चिद्राज्यमिच्छति सभोजनंपरित्यज्यक्षुन्निवृत्तिम
भीप्सति ४४ सधन्यःसचविज्ञानीसएवसुरपूजितः सदीक्षितः।
सुखीसाधुःसत्यवादीजितेंद्रियः ४५ सवेदवक्ताव्याख्याधीसर्वाने

46

दपरायणः स्वस्मिन्कालीनत्वंसंभाव्यपूजयेज्जगदंबिकां ४६ त्रैलो
क्यविजयीभूयान्नात्रकार्याविचारणा गुरुरूपंशिवंध्यात्वाशिवरू
पंगुरुंस्मरेत् ४७ सदाशिवःसएवस्यान्नात्रकार्याविचारणा गोप
नीयंप्रयत्नेनरक्षणीयंस्वयोनिवत् ४८ रहस्यातिरहस्यंचरहस्यंच
रहस्यकं श्लोकार्धंपादमात्रंवापादार्धंचतदर्थकं ४९ वाममार्थंवा
पठेद्देविनवंध्यंदिवसंचरेत् पुस्तकंपूजयेद्भक्त्यात्वाहूतिफलसिद्ध
ये ५० नचमारीभयंतत्रनचाग्निवातसंभवं नभूतादिभयंतत्रसर्वं ५६

त्सद्वखेमेधते ५१ ॐ कुंकुमालक्तकेनैव रोचनागुरुयोगतः भूर्जपत्रे लिखे
दैतत्सर्वकामार्थसिद्धये ५२ इति संक्षेपतः प्रोक्तं किमन्यच्छ्रोतुमिच्छ
सि ५३ इति गदितमशेषं कालिकावर्णरूपमभिनवसुखकामं सर्ववि
द्याभिरामं प्रपठति यदि भक्त्या सर्वसिद्धीश्वरः स्याद्भवति सकलसि
द्धिः सर्वरूपा समृद्धिः ५४

पावह्निवल्लभांतःक्रमादिह शास्त्रवादेमहाघोरेकविल्वेचास्त्र
संग्रहे ५ मंगलेसर्वकार्येषुस्तंभनेमोहनेतथा मारणादौत
थाकार्येनिर्विघ्नोमेप्रजायतां॥६ यदिवा–ह्वनिगदेसभायांवा
दिदुर्गमे शुद्धंनदिनिस्तानेतुसर्वज्ञहरवल्लभे ७ ॐमहाप्रेता
सनायातुशिखांमेरक्षतांसदा रसनांमातृकाकाराखंडमाला
सदावतु ८ अभयंवरदश्चैवत्वक्ज्ञोऽखंडश्चरक्षतु शावह्यंता
थाकर्णैघोरदंष्ट्रासदावतु ९ शुक्राश्चचिक्रराःपांतुममविघ्न

विनाशका: दक्षिणकालिकापातुचंडमुंडविनाशिनी १०
महाकालीसदापातुबीजभूषितमस्तका इत्येवंकवचंयस्तु
कालिकायाःपठेन्नरः ११ मंत्रविन्नर्पयेद्धीमान्सप्राप्नोतिम
नोगतिं भूर्जपत्रेसुवर्णेवा राजतेवाथपत्रके १२ लिखित्वा
धारयेद्यस्तुयत्रकुत्रापिमंत्रयुक् तस्यदर्शनमात्रेणवादि
नांविलयःसदा १३ सर्वमनोगतंतस्यसिध्यतेचनसं
शयः ॥

2

ॐसर्वंहिकथितंपूर्वंकवचंनप्रकाशितं इदानींप्रेमभा
वेनकथयस्वममाग्रतः १ कालिकाकमला
कालीकालरात्रिस्वरूपिणी मुंडमालादेहधराकवरीचप्रिया
वतु २ ममगात्राणिविश्वाणिकालिकाव्योममनोहरी शि
रोमेपातुचामुंडाकंठंपातुवृषध्वजी ३ हृदयंपातुमाहेश्वरी
वैष्णवीनाभिमंडले नितंबंपातुरक्ताक्षीमध्यंपातुरणप्रिया

दक्षबाहुस्थलंपातुदेवीविंध्यनिवासिनी कक्षस्थानंसोमराज्ञी
मणिबंधंशिवावतु १० दक्षहस्ताग्रतन्मूलंमूलाधारनिवा॰
सिनी पृष्ठंरक्षतु— विंद्याऽर्धंरक्षतुहस्तिनी ११ लोलजिह्वा
दक्षनेत्रवामंरक्षतुमानदा दक्षश्रोत्रंसोमराजीनामयुग्मंभयंका॰
री १२ ओष्ठाधरंसोमकंठीदि— —रक्षतुभैरवी गंडंरक्षतुभोगांगी॰
चिबुकंतुंडधारिणी १३ मेरुदंडंललाटाक्षीनीवारक्षतुकालि
का ग्रासनंपातुमेनित्याजिह्वाग्रंभक्तवत्सला १४ चिबुंरक्षतु॰

विशालाक्षीपातुगुह्यंऊरुयुग्मंतथांबिका जानुयुग्मंमुंडमाला
गुल्फयुग्मेललाटिका ५ कमलाशैलपुत्रीचकामप्रथमपू।
जिता पादाग्रंतीर्थपादास्यात्कराग्रंतीर्थदर्शिनी ६ तीर्थरू
पाचतन्मूलंभीमापातुतदंगुलीम् करमूलंकरालास्यात्कंकाला
मातुरावतु ७ मणिबंधंजटाधारीकराग्रंशिवदावतु करां—
युगलंपायात्सिद्धधात्रीसदाननम् ८ कामदुग्धावामपार्श्वंद।
क्षिणंमांसशेखरा अट्टहासाचग्रीवांमांसदारक्षतुखेचरी ९

कौशांबीवचनंचारुभूषणा वाञ्छन्तसोत्कंठाप्राणान्त्रत्तसंय
मी १५ इदंतुकालिकादेव्याःकवचंसर्ववाचिनं प्रातःकालेतु
विर्भूत्वामध्याह्नेवाप्तुविस्थितः १६ संध्यायांवापठेन्मंत्रीनस्यरा
ज्ञावशोभवेत् मंत्रिणंबंधुवर्गंचदासयेद्योवरानने १७ पठेद्वा
पाठयेद्योपिभक्तियुक्तःपठेत्सुधीः कवितांविपुलांलाभेवाग्मीभ
वतिनान्यथा १८ सचिरायुःसुखीपुत्रीप्रज्ञांतेयःपठेत्सदा नच
व्याधिर्नैवभेदीनविवादीजितेंद्रियः १९ सर्वान्कामानवाप्नोतिक

ववस्यप्रसादतः २०